# केन्द्रीयसंस्कृतविश्वविद्यालयः
## ज्योतिषविभागः
## एकलव्यपरिसरः अगरतला,त्रिपुरा।

विषयः- लघुजातकम्
कक्षा-प्राक्शास्त्रिद्वितीयवर्षम्
पत्रम्-षष्ठम्

डा. ब्रह्मानन्दमिश्रः
सहायकाचार्यः ज्योतिषविभागः
एकलव्यपरिसरः अगरतला, त्रिपुरा

## दीर्घोत्तरप्रश्नाः

**प्रश्न 01– राशीनांस्वरूपं सोदाहरणं विशदयत।**

**उत्तरम्–** राशि इति कथनेन कस्यचिद् समूहविशेषस्य अवबोधो भवति। अत्र प्रश्नः वर्तते कस्यः समूहः? उत्तरम् अस्ति नक्षत्राणां समूहः। ज्योतिषशास्त्रे नक्षत्राणां संख्या सप्तविंशतिः 27 वर्तते। एकस्मिन् नक्षत्रे चत्वारः चरणाः भवन्ति तथा च सप्तविंशतिः नक्षत्राणां आहत्य 108 चरणाः वर्त्तन्ते। एते अष्टोत्तरशतपादाः द्वादशराशिभिः विभज्यते तदा लब्धिसंख्या नव 9 भवति। अतः नवचरणानां एको राशि सिध्यति।

**सप्तविंशतिभानां न नवभिर्नवभिः पदैः।**
**अश्विनीप्रमुखानां च मेषाद्या राशयः स्मृताः।।**

राशिः नाम क्षेत्रम्। क्षेत्रस्य अभिप्रायो भवति स्थानम्। सम्पूर्णब्रह्माण्डे 360 अंश परिमितमेकं भचक्रं विद्यते यस्य नामोस्ति क्रान्तिवृत्तम् अर्थात् क्रान्तिवृत्तस्य द्वादशतमस्य भागस्य स्थानं राशिः संज्ञा उच्यते। ते क्रमशः मेषः, वृषः, मिथुनः, कर्कः, सिंहः, कन्या, तुला, वृश्चिकः, धनुः, मकरः, कुम्भः, मीनः इति द्वादशराशयः सुविख्याता वर्त्तते।

**मेषो वृषश्च मिथुनः कर्क सिंहकुमारिकाः।**
**तुलालिधनुषो नक्रकुम्भमीनास्ततः परम्।।**

राशेः पर्यायवाचिशब्दरूपेण क्षेत्रं, गृहं, ऋक्षं, भं, भावश्चादयः व्यवह्रियन्ते।लघुजातकग्रन्थे राशीनां शीर्षोदय–पृष्ठोदय–उभयोदयादि संज्ञा वर्णिता सन्ति। अत्र मनसि प्रश्नः आगच्छति यत् शीर्षोदय–पृष्ठोदय–दभयोदय शब्दानां कोऽर्थः? अस्य कः अभिप्रायः? अस्य अर्थंऽस्ति येषां राशीनां पृष्ठादिक्रमेण उदयो भवति सः पृष्ठोदयः। यस्य राशेः कदाचित् शीर्षं कदाचित् पृष्ठभागः पादभागो वा सः उभयोदयराशिः कथ्यते यथा–

**मेषाद्याश्चत्वारः सधन्विमकराः क्षपाबलाज्ञेयाः।**
**पृष्ठोदया विमिथुना शिरसान्ये ह्युभयतो मीनः।।**

एवमेव अस्यां श्लोके राशीनां दिवारात्रि बलं च विषये उक्तं अस्ति यत् मेष, वृष, मिथुनः, कर्कः, धनुः, मकराश्च एते राशयः क्षपाबला भवन्ति तथा अन्याः ये राशयः यथा सिंहः,

कन्या, तुला, वृश्चिकः, कुम्भः, मीनादयाः दिवाबली भवन्ति। राशीनां स्वामी विषयेऽपि ग्रन्थेस्मिन् उक्तंमस्ति।

**कुजशुक्रज्ञेन्द्वर्कज्ञशुक्रकुजजीवसौरियमगुरवः।**
**भेषा नवांशकानामजमकरतुलाकुलीरराद्याः।।**

अर्थात् द्वादश राशीनां स्वामिनः नवग्रहाः भवन्ति। यथा मेषराशेः स्वामिः भौमः, वृषस्य शुक्रः, मिथुनस्य बुधः, कर्कस्य चन्द्रः, सिंहस्य सूर्यः, कन्यायाः बुधः, तुलायाः शुक्रः, वृश्चिकस्य भौमः, धनुराशेः गुरू, मकर कुम्भस्य च शनिः, मीनराशेः स्वामिः वृहस्पति भवति।

**प्रश्न 02– राशीनां वर्णज्ञानं प्रतिपादयत।**

**उत्तरम्–** लघुजातकम् ग्रन्थस्य आदौ राशीनां वर्णज्ञान विषये चर्चा कृता अस्ति। राशीनां वर्णज्ञानेनैव जातकस्य वा अन्यस्यापि अभीष्टपदार्थस्य वर्णज्ञानं कर्तुं शक्यते। समेषां द्वादश राशीनां पृथक–पृथक वर्णाः भवन्ति। यथा–

**अरूणसितहरितपाटलपाण्डुविचित्रा सितेतरपिशंगौ।**
**पिंगलकर्बुरबभ्रुकमलिना रूचयो यथा सख्यम्।।**

अर्थात् मेषराशेः अरूण वर्णः, वृषराशे शुक्ल वर्णः, मिथुनराशेः हरितवर्णः (शुक्वर्णसदृशः) कर्कराशेः पाटलवर्णः (श्वेतरक्तमिश्रितः) सिंहराशेः पाण्डुवर्णः, कन्याराशेः विचित्रवर्णः, तुलाराशेः कृष्णवर्णः, वृश्चिकराशेः पिंगलः (सुवर्णसदृशवर्णः) धनुःराशेः पिंगलवर्णः, मकरराशेः कर्बुरवर्णः, (शुक्लकपिलमिश्रितः) कुम्भरशेः बभ्रुकवर्णः तथाश्च मीनराशेः मलिनवर्णः अर्थात् मत्स्यसदृशः भवति। एवमेव जातकस्य स्वरूप–प्रकृति–प्रकृति–वर्ण गुणादि ज्ञानार्थं राशीनां याः याः संज्ञा विद्यते ताषां ज्ञानंऽपि आवश्यकं भवति।

**प्रश्न 03– द्वादशराशीनां दिग्कालबलं–चर–स्थिर–द्विस्वभावसंज्ञाश्च लिखत।**

**उत्तरम्–** मेषादयो द्वादशराशयः क्रमेण पुरूष–स्त्री, क्रूर–अक्रूर, चर–स्थिर–द्विषभाव संज्ञकाश्च भवन्ति। यथा– मेषराशिः– पुरूषः, क्रूरः (अशुभः), चरसंज्ञकः। वृषराशिः–स्त्री, अक्रूरः(शुभः), स्थिरसंज्ञकः, मिथुनराशिः–पुरूषः, क्रूरः, द्विस्वभावसंज्ञकः, कर्कराशिः–स्त्री, अक्रूरः,चरः, सिंहराशिः–पुरूषः, क्रूरः, स्थिरः, कन्याराशिः–स्त्री, अक्रूरः, द्विस्वभावः, तुलाराशिः–पुरूषः, क्रूरः, चरसंज्ञकः, वृश्चिकराशिः–स्त्रीसंज्ञकः, अक्रूरः, स्थिरः, धनुराशिः–पुरूषः, क्रूरः, द्विस्वभावः, मकरराशिः–स्त्री, अक्रूरः, चरः, कुम्भराशिः–पुरूषः, क्रूरः, स्थिरः, मीनराशिः–स्त्री, अक्रूरः तथा च द्विस्वभाव संज्ञक भवति यथा लघुजातकेऽपि उक्तम् यथा–

**पुंस्त्री–क्रूराक्रूरौ चरस्थिरद्विस्वभाव संज्ञाश्च।**
**अजवृषमिथुनकुलीराः पंचमनवमैः सहैन्द्राद्या।।**

एवमेव मेषादि द्वादशराशीनां पूर्वादि चतसृषु दिशासु दक्षिणावर्त क्रमेण कल्पना कृता वर्तते। यथा पूर्वस्यां दिशि मेष राशेः, दक्षिणस्यां दिशि वृष राशिः, पश्चिमस्यां दिशि मिथुनः, उत्तरस्यां दिशि कर्कराशिः च, अस्मिनेव क्रमे त्रिरावृत्तं चतसृषु दिशासु दक्षिणावर्तक्रमेण राशीनां स्थापना कृत्वा दिशा निर्धारितंमस्ति। राशीनां दिक्काल विषये उक्तम अस्ति यत्

नृपचतुष्पदकीटजलचराः राशयः क्रमेण पूर्वदक्षिणपश्चिमोत्तरगताः बलिनः भवन्ति। अर्थात् जन्मकुण्डल्यां लग्नदशमसप्तमचतुर्थस्थानानि क्रमेण पूर्वदक्षिणपश्चिमोत्तर दिक्बोधकानि ज्ञेयानि।

**प्रश्न 04– ग्रहाणां दृष्टिविचारः सोदाहदरणं प्रतिपादयत।**

**उत्तरम्–** जातकशास्त्रे विशेषतया ग्रहदृष्टिविचारस्य महती भूमिका वर्तते। ग्रहदृष्टि मानवदृष्टिवदेव भवति। यथा कोपि मानवः कुत्रचित एकस्मिन् स्थाने स्थितः भूत्वा गमनागमनसमये, स्वसम्मुखं तथा इतस्ततः पश्यति तथैव ग्रहाः अपि स्व–स्वविमण्डले गच्छन्तः कस्मिंश्चित् स्थानविशेषे पश्यन्ति। एवमेव यथा कस्यापि पुरूषस्य समक्षं यः पदार्थः यत् स्थानं वा भवति तस्मिन् स्थाने सः पुरूषः पूर्णदृष्ट्या पश्यति। तथा च ये पदार्थः पार्श्वे भवन्ति तान पदार्थान् सः स्वल्पदृष्ट्या पश्यति। तत्रैव ग्रहाः अपि स्वस्थानात् अन्येषु स्थानेषु भिन्न–भिन्नदृष्ट्या अवलोकयन्ति। यः ग्रहः पश्यति सः दृष्टा भवति, तथा यं ग्रहं स्थानं वा पश्यति सः ग्रहः तत् स्थानं वा दृश्यम् उच्यते। ग्रहणां दृष्टिः द्विधा भवति–

**1.सामान्यदृष्टिः**

**2.विशेषदृष्टिः**

**सामान्यदृष्टि–** सर्वे ग्रहाः स्वस्थानात् कस्मिन्–कस्मिन् स्थाने कियत परिमाणेन पश्यन्ति इति विषये उक्तं अस्ति। जन्मांगचक्रे यस्मिन स्थाने यस्मिन् राशौ वा सूर्यादयः अर्थात् सूर्यः, चन्द्रः, भौमः, बुधः, गुरूः, शुक्रः, शनिः ग्रहाः स्थिता भवन्ति तस्मात् स्थानात् तृतीय स्थाने, दशम स्थाने च ते ग्रहाः एकपाददृष्ट्या पश्यन्ति। तथैव ग्रहाधिष्ठानात् नवम स्थाने पंचम स्थाने च अर्थात् ग्रहाः यत्र तिष्ठन्ति तस्मात् त्रिकोण स्थाने द्विपाददृष्ट्या पश्यन्ति। चतुर्थस्थानम् अष्टमस्थानं च सर्वे ग्रहाः पादोन दृष्ट्या अर्थात् त्रिपाददृष्टया अवलोकयन्ति। तथा च सप्तम स्थानं सर्वे ग्रहाः पूर्णदृष्ट्या पश्यन्ति। यथा ग्रहाः पश्यन्ति तथैव फलान्यपि प्रयच्छन्ति। यथा लघुजातके ग्रन्थे उक्तं अस्ति –

**दशम–तृतीये नव–पंचमे चतुर्थाष्टमे कलत्रं च।**
**पश्यन्ति पादवृद्धया फलानि चैवं प्रयच्छन्ति।।**

अत्र एकं कल्पितोदाहरणेन पश्यामः एकः तुलालग्नस्य जन्मांगचक्रम् अस्ति। लग्ने सूर्यः, बुधः, शनैश्चराः लग्ने तुलाराशौ स्थिताः सन्ति। अतः त्रयः ग्रहाः स्वस्थानात् तृतीयस्थानं धनुराशिं दशमस्थानं कर्कराशिं च एकपाददृष्ट्या पश्यन्तः सन्ति। सूर्यःशनिबुधाः पंचम स्थानं कुम्भराशिं नवमस्थानं मिथुनराशिं च द्विपाददृष्ट्या पश्यन्ति। एते ग्रहाः स्वस्थानात् तुलातः चतुर्थस्थानं मकरराशिं अष्टमस्थानं वृषराशिंच त्रिपाददृष्ट्या पश्यन्ति। एते ग्रहाः स्वस्थानात् अर्थात् सप्तमस्थानं मेषराशिं सम्पूर्णदृष्ट्या पश्यन्तः सन्ति। एषा ग्रहाणां सामान्या दृष्टिः भवति। एवमेव ग्रहाणां दृष्टि सर्वत्र विचारणीय भवति।

**विशेषदृष्टिः–** सर्वेषां ग्रहाणां कृते सामान्या दृष्टिः समाना एव भवति। परन्तु शनिजीवकुजश्च त्रयाणां ग्रहाणां कृते विशेषदृष्टिः अपि भवति। यथा शनिः स्वस्थानात् तृतीयस्थानं दशमस्थानं च पूर्ण दृष्ट्या पश्यति। बृहस्पतिः त्रिकोणस्थानं अर्थात् पंचम

नवमस्थानं च पूर्णदृष्ट्या पश्यति। भौमः चतुरस्त्रम् इत्युक्ते चतुर्थस्थानम् अष्टमस्थानं च पूर्णदृष्ट्या पश्यति। एवमेव शनिबृहस्पतिभौमः त्रयाणां ग्रहाणां दृष्टि सर्वत्र विचारणीय भवति। यथा–

**पूर्णम्पश्यति रविजस्तृतीयदशमे त्रिकोगमपि जीवः।**
**चतुरस्त्रं भूमिसुतः सितार्कबुधहिमकराः कलत्रं च।।**

**प्रश्न 05– कालपुरुषस्य अंगविभागानां सोदाहरणं प्रतिपादयत।**

**उत्तरम्–**

**शीर्षमुखबाहुहृदयोदराणि कटिबस्तिगुह्यसंज्ञानि।**
**उरु जानू जंघे चरणाविति राशयोजाद्याः।।**
**कालनरस्यावयवान् पुरुषाणां चिन्तयेत्प्रसवकाले।**
**सदसद्ग्रहसंयोगात् पुष्टाः सोपद्रवास्ते च।।**

ज्योतिषशास्त्रस्य अनेकषु ग्रन्थेषु आचार्यैः कालपुरुषस्यविषये चर्चा कृता वर्तन्ते। ते कालपुरुषस्य द्वादशअंगानि स्वीकुर्वन्ति। मानवानां जन्मसमये कालपुरुषस्य यस्मिन अंगेषु निर्बलः–पापग्रहेण युतश्च राशयः भवन्ति तेषु अंगेषु जातकस्य विविधरोगाः भवन्ति। अधुना पश्यामः यत् कालपुरुषस्य द्वादश अंगेषु द्वादशराशीनां स्थानं कुत्र–कुत्र भवति। यथा– मेषराशिः मस्तकं, वृषराशिः मुखं, मिथुनराशिः भुजद्वयं, कर्कराशिः हृदये, सिंहराशिः उदरस्थानं, कन्याराशिः कटिस्थलम्, तुलाराशिः वस्तिः नाभिलिंगयोर्मध्यभागे, वृश्चिकराशिः गुह्यागं लिंगादिगुप्तांगानि, धनुराशिः उरुः, मकरराशिः जानुः, कुम्भराशिः जंघद्वयं, मीनराशिः पादद्वयं च भवति।

केन्द्रीयसंस्कृतविश्वविद्यालयः एकलव्यपरिसरः
अगरतला, त्रिपुरा

डॉ. ब्रह्मानन्दमिश्रः
(लब्धस्वर्णपदकः)
सहायकाचार्यः ज्यौतिषविभागः